# श्रीश्रीशगुणदर्पणस्तोत्रम्

या सुगन्धास्यनासादिनवद्वाराऽखिलेन या ।
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी ॥ १॥

या नित्यपुष्टा सर्वाङ्गैः सौन्दर्यादिगुणैरपि ।
"ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" (श्रीसूक्त ९) ॥ २॥

मातर्लक्ष्मि नमस्तुभयं माधवप्रियमानिनि ।
युवां विश्वस्य पितरावितरेतरयोगिनौ ॥ ३॥

"समना" (ब्र.सू. ४.२.७) किल मातस्त्वममुना ततयोगिनी ।
मम नाथेन देवश्च विमनाश्च न स त्वयि ॥ ४॥

त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः ।
त्वं मूलप्रकृतिर्देवी स चादिपुरुषः किल ॥ ५॥

यस्त्वामुरसि धत्तेऽम्ब कौस्तुभद्युतिभासिते ।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत् ॥ ६॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः ।
युवां युवानौ सततं युवयोर्न वयोऽधिकः ॥ ७॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा ।
पद्मद्वयधरा पद्मकोशोद्यत्स्तनशोभना ॥ ८॥

पद्महस्ता पद्मपादा पद्मनाभमनःप्रिया ।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी ॥ ९ ॥

अम्बां पीताम्बरश्रोणीं लम्बालकलसन्मुखीम् ।
बिम्बाधरोष्ठीं कस्तूरिजम्बालतिलकां भजे ॥ १० ॥

रत्नोद्दीप्तसुमाङ्गल्यसूत्रवृत्तशिरोधराम् ।
कुण्डलप्रभयोद्दण्डगण्डमण्डलमण्डिताम् ॥ ११ ॥

कुचकञ्चुकसञ्चारिहारनिष्क्रमनोहराम् ।
काञ्चीकिङ्किणिमञ्जीरकङ्कणाद्यैरलङ्कृताम् ॥ १२ ॥

सुवर्णमण्डपे रत्नचित्रसिंहासनोत्तमे ।
नमामि हरिणा साकमिन्दिरां कृतमन्दिराम् ॥ १३ ॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुराङ्गनाः ।
यां पूजयन्ते सेवन्ते सा मां पातु रमा सदा ॥ १४ ॥

सर्वालङ्कारभरितौ सर्वज्ञौ सर्वसद्गुणौ ।
शर्वादिसर्वभक्तौघसर्वसर्वस्वदायकौ ॥ १५ ॥

सुमुखौ सुन्दरतरौ सुनासौ सुखचित्तनू ।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः ॥ १६ ॥

चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता ।
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेः प्रिया ॥ १७ ॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम् ।
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम् ॥ १८ ॥

वादिराजेन रचितं श्रीश्रीशगुणदर्पणम् ।
इमं स्तवं पठन्मर्त्यः श्रीमान्स्यान्नात्र संशयः ॥ १९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीश्रीशगुणदर्पणस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु